ज्वलनम्, ज्वलनम्-ज्वालनम्-प्रज्वलनम्, जिज्वलिषणम्, जाज्वलनम्;
ज्वलित्वा, ज्वलयित्वा-ज्वालयित्वा, जिज्वलिषित्वा, जाज्वलित्वा;
प्रज्वल्य, [1]संज्वलय्य-प्रज्वलय्य, प्रजिज्वलिष्य, प्रजाज्वल्य;
ज्वालम् २, } [2]ज्वलम् २-ज्वालम् २, प्रज्वलम् २, } जिज्वलिषम् २, }
ज्वलित्वा २, } ज्वलयित्वा २-ज्वालयित्वा २, } जिज्वलिषित्वा २, }
जाज्वलम् २; }
जाज्वलित्वा २. }

(633) "झट सङ्घाते" (I-भ्वादिः-306. अक. सेट्. पर.)

सङ्घातः=संहननम्, मिश्रीकरणं च ।

झाटकः-टिका, झाटकः-टिका, जिझटिषकः-षिका, जाझटकः-टिका;
[A]झाटः, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककठतिवत् (148) ज्ञेयानि ।

(634) "झमु अदने" (I-भ्वादिः-472. सक. सेट्. पर.) मित् ।

झमकः-मिका, झमकः-मिका, [3]जिझमिषकः-षिका, जञ्झमकः-मिका;
झमिता-त्री, झमयिता-त्री, जिझमिषिता-त्री, जञ्झमिता-त्री;
[B]झमन्-न्ती, इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकछमतिवत् (564) ज्ञेयानि ।

(635) "झर्झ परिभाषणहिंसातर्जनेषु" (I-भ्वादिः-718.सक.सेट्.पर.)

झर्झकः-र्झिका, झर्झकः-र्झिका, जिझर्झिषकः-षिका, जाझर्झकः-र्झिका;
झर्झन्-न्ती, [4]झर्झरः[C], इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचर्चतिवत् (505) ज्ञेयानि ।

---

1. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।
2. 'चिण्णमुलोः—' (6-4-93) इति णमुल्परे णौ दीर्घविकल्पः ।
3. सनि, 'छे च' (6-1-73) इति तुक् नात्र प्रवर्तते, इति छमुधातोः, अस्य च विशेषः ।
4. बाहुलकात् अरः=झर्झरः=वाद्यविशेषः ।

A. 'अशोटनीयैः सुधियामसेटकैर्युतान् जटाझाटधरैश्च केश्चन ॥' धा. का. 1.40.
B. 'चान्तामिषश्छान्तजलः फलावलीं जान्त्वा झमञ्जेमनमक्रमीद् गुहाम् ॥' धा. का. 1.60.
C. 'जीमूतचर्चिरवझर्झरवाद्यहृद्यं
तेनैव चानुपिसितो निलयं पिपेस ॥' धा. का. 1.89.